रिका।) काकोडुम्बरिका। काकडुमुरि इति भाषा। अस्याः पर्य्यायः। काकोदुम्बरिका २ खरपत्री ३ राजिका ४ क्षुद्रोदुम्बरिका ५ कुष्ठघ्नी ६ मलयुवाटिका ७ अजाजी ८ फल्गुनी ९ मलपूः १० चित्रभेषजा ११ ध्वाङ्क्षनाम्नी १२। अस्या गुणाः। शीतलत्वम्। कषायत्वम्। व्रणनाशित्वम्। गर्भरक्षाहितत्वम्। स्तनदुग्धप्रदत्वञ्च। इति राजनिर्घण्टः॥

काकोलं, क्ली, (काकयति लोलयति दुःखदत्वात्। कक लौल्ये + णिच् + ओल। काकेन उच्चार्य्यते मन्यते अत्र वा आधारे घञर्थे कः पृषोदरादित्वात् साधुः।) नरकविशेषः। इति मेदिनी॥ (यथा, मनुः।
"महानरककाकोलं सञ्जीवनमहापथम्"॥)

काकोलः, पुं स्त्री, (कु कुत्सितं तीव्रतरं यथा स्यात् तथा कोलति पीडयति विकलीकरोति वाऽनेन करणे घञ्।) कृष्णवर्णस्थावरविषविशेषः। इत्यमरः।१।८।१०॥
"काकोलमुग्रतेजः स्यात् कृष्णच्छविमहाविषम्"। इति वैद्यकम्॥ (अस्य पर्य्यायो यथा,—
"काकोलो गरलक्ष्वेडो वत्सनाभः प्रदीपनः। शौल्किकेयो ब्रह्मपुत्त्रो विषं स्याद्गरलो विषः"॥ इति वैद्यकरत्नमाला॥)

काकोलः, पुं, (कं जलमाकोलति संस्त्यायतीति। आ + कुल संस्त्याने + अण्।) कुलालः। (कक लौल्ये स्वार्थे णिच् + बाहुलकात् ओल।) द्रोणकाकः। इति मेदिनी। (यथा, मनुः ५।१४।
"बकञ्चैव बलाकाञ्च काकोलं खञ्जरीटकम्। मत्स्यादान् विड्वराहांश्च मत्स्यानेव च सर्व्वशः"॥) सर्पः। शूकरभेदः। इति शब्दरत्नावली॥ काकोली नामख्यातौषधिविशेषः। इति धरणी॥

काकोली, स्त्री, (काकोल + गौरादित्वात् ङीष्।) अष्टवर्गे प्रसिद्धौषधविशेषः। तत्पर्य्यायः। मधुरा २ काकी ३ कालिका ४ वायसोली ५ क्षीरा ६ ध्वाङ्क्षिका ७ वीरा ८ शुक्ला ९ धीरा १० मेदुरा ११ ध्वाङ्क्षोली १२ स्वादुमांसी १३ वयःस्था १४ जीवनी १५ शुक्लक्षीरा १६ पयस्विनी १७। इति राजनिर्घण्टः॥ पयस्या १८ शीतपाकी १९। इति रत्नमाला॥ अस्या गुणाः। शीतलत्वम्। मधुरत्वम्। क्षयपित्तानिलार्त्तिरक्तदाहज्वरनाशित्वम्। कफशुक्रवर्द्धकत्वञ्च। इति राजनिर्घण्टः॥
(क्षीरकाकोलीशब्दे चास्या विशेषविवरणं ज्ञातव्यम्। काकोल्यादिगणो यथा, "काकोलीक्षीरकाकोलीजीवकर्षभकमुद्गपर्णीमाषपर्णीमेदामहामेदाच्छिन्नरुहाकर्कटशृङ्गीतुगाक्षीरीपद्मकप्रपौण्डरीकर्द्धिवृद्धिमृद्वीकाजीवन्त्यो मधुकञ्चेति"।
"काकोल्यादिरयं पित्तशोणितानिलनाशनः। जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा"॥ इति सुश्रुते सूत्रस्थाने। ३८ अध्याये॥)

काकोलूकिका, स्त्री, (काकश्च उलूकश्च नित्यविरोधित्वात् द्वन्द्वः। ततो वैरे वुन् स्त्रियां टाप् च।) काकोलूकयोर्वैरता। इति शब्दरत्नावली॥

काक्ष इ काङ्क्षणे। आकाङ्क्षायामिति यावत्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-इदित्।) इ काञ्चति धनं लोकः। नमध्यपाठेनैवेष्टसिद्धे इदनुबन्धो वेदेमूच्चारणभेदार्थः। इति दुर्गादासः॥

काक्षः, पुं, (कु कुत्सितं अक्षं अत्र। "का पथ्यक्षयोः" ६।३।१०४। इति कोः कादेशः।) कटाक्षः। इति हेमचन्द्रः। (यथा, भट्टिः। ८।२४।
"आबद्धाभोम्मुखो दूरात् काक्षेणानादरेक्षितः"॥)

काक्षी, स्त्री, (कक्षे कक्षे भवः। "तत्र भवः" ४।३।५३। इत्यण् ततो ङीप् च।) तुवरिका। अड़र इति भाषा। सौराष्ट्रमृत्तिका। इति मेदिनी॥

काक्षीवः, पुं, (कु ईषत् क्षीवयति। क्षीव + णिच् + अच्। कोः कादेशः।) शोभाञ्जनवृक्षः। इत्यमरः। (गौतमात् शूद्रायामौशीनर्य्यां जातः पुत्त्रविशेषः। यथा महाभारते २ पर्व्वणि।
"शूद्रायां गौतमो यत्र महात्मा संशितव्रतः। औशीनर्य्यामजनयत् काक्षीवाद्यान् सुतान्मुनिः"॥)

काक्षीवकः, पुं, (काक्षीव + स्वार्थे कन्। यद्वा ईषत्क्षीवयतीति। ण्वुल्।) शोभाञ्जनः। इति शब्दरत्नावली॥

कागः पुं, (का इति शब्दं गायतीति। का + गै + कः।) काकः। इति जटाधरः॥

कागदं, क्ली, (कागः काकवर्णः मस्यादिर्दीयते अत्र इति। काग + दा + घञर्थे आधारे कः। कस्य चित्तस्य आगदो विस्तारितभावणं यत्र वा।) लेखनपत्रविशेषः। कागज इति आर्बी भाषा। यथा,
"भूर्ज्जे वा वसने रक्ते क्षौमे वा तालपत्रके। कागदे चाष्टगन्धेन पञ्चगन्धेन वा पुनः॥ त्रिगन्धेनाथवैकेन विलिख्य धारयेन्नरः। पञ्च सप्तत्रिलोकैर्व्वा शोधितं कवचं शुभम्"॥ इति श्रीघनानन्ददासविरचितमन्त्रकल्पद्रुमे हनूमत्कवचम्॥

काङ्गा, स्त्री, (कुत्सितं अङ्गं यस्याः। काङ्ग + टाप्।) वचा। इति शब्दचन्द्रिका॥

काचं, क्ली, (कच्यते बध्यते अनेन इति। कच बन्धने + घञ् न कुत्वम्। तस्य बन्धनहेतुत्वात् तथात्वम्।) सिक्थकम्। मोम इति भाषा। (काचः क्षारमृत्तिकाऽस्त्यस्याकरत्वेन इति अच्।) काचलवणम्। इति राजनिर्घण्टः॥

काचः, पुं, (कच दीप्तौ + णिच् + घञ्।) मृत्तिकाविशेषः। काँच् इति भाषा। तत्पर्य्यायः। क्षारः २। इत्यमरः। २।९।९९॥ अस्य गुणाः। क्षाररसत्वम्। उष्णवीर्य्यत्वम्। अञ्जनात् दृष्टिकारित्वञ्च। इति राजवल्लभः॥ शिक्यम्। शिका इति भाषा॥ मणिविशेषः। (यथा,
"आकरे पद्मरागाणां जन्म काचमणेः कुतः"। इत्युद्भटः॥) नेत्ररोगविशेषः। इति मेदिनी॥ तस्य लक्षणम्।
"अस्मिन्नपि तमोभूते नातिरूढ़े महागदे। चन्द्रादित्यौ सनक्षत्रावन्तरीक्षे च विद्युतः॥ निर्म्मलानि च तेजांसि भ्राजिष्णूनीव पश्यति। स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः"॥ इति माधवकरः॥
("प्राप्नोति काचतां दोषे तृतीयपटलाश्रिते। तेनोर्द्ध्वमीक्षते नाधस्तनुचैलावृतोपमम्॥ यथावर्णञ्च रज्येत दृष्टिर्हीयेत च क्रमात्। तथाप्युपेक्षमाणस्य चतुर्थं पटलं गतः॥ लिङ्गनाशं मनः कुर्व्वन् छादयेद्दृष्टिमण्डलम्। तत्र वातेन तिमिरे व्याविद्धमिव पश्यति॥ चलाविलारुणाभासं प्रसन्नञ्चेक्षते मुहुः। जालानि केशान् मशकान् रश्मींश्चोपेक्षितेऽत्र च॥ काचीभूते दृगरुणा पश्यत्यास्यमनासिकम्। चन्द्रदीपाद्यनेकत्वं वक्रमृज्वपि मन्यते॥ वृद्धः काचो दृशं कुर्य्याद्रजोधूमवृतामिव। स्पष्टारुणाभां विस्तीर्णां सूक्ष्मां वा हतदर्शनाम्॥ स लिङ्गनाशो वाते तु सङ्कोचयति दृक्शिराः। दृङ्मण्डलं विशत्यन्तर्गम्भीरा दृगसौ स्मृता॥ पित्तजे तिमिरे विद्युत् खद्योतोद्योतदीपितम्। शिखितित्तिरिपिच्छाभं प्रायो नीलञ्च पश्यति॥ काचे दृक् काचनीलाभा तादृगेव च पश्यति। अर्केन्दुपरिवेषाग्निमरीचीन्द्रधनूंषि च॥ भृङ्गनीला निरालोका दृक् स्निग्धा लिङ्गनाशतः। दृष्टिः पित्तेन ह्रस्वाख्या सा ह्रस्वा ह्रस्वदर्शना॥ भवेत्पित्तविदग्धाख्या पीतापीताभदर्शना। कफेन तिमिरे प्रायः स्निग्धं श्वेतञ्च पश्यति॥ शङ्खेन्दुकुन्दकुसुमैः कुमुदैरिव चाचितम्। काचे तु निष्प्रभेन्द्वर्कप्रदीपाद्यैरिवाचितम्॥ सिताभा सा च दृष्टिः स्याल्लिङ्गनाशे तु लक्ष्यते। मूर्त्तः कफो दृष्टिगतः स्निग्धो दर्शननाशनः॥ बिन्दुर्जलस्येव चलः पद्मिनीपुटसंस्थितः। उष्णे सङ्कोचमायाति छायायां परिसर्पति॥ शङ्खकुन्देन्दुकुमुदस्फटिकोपमशुक्लिमा। रक्तेन तिमिरे रक्तं तमोभूतञ्च पश्यति। काचेन रक्ता कृष्णा वा दृष्टिस्तादृक् च पश्यति"॥ इति वाभटे उत्तरस्थाने। १२ अध्याये॥ विस्तृतविवरणमस्य नेत्ररोगशब्दे ज्ञातव्यम्॥)

काचनं, क्ली, (कच बन्धने + स्वार्थे णिच् + भावे ल्युट्।) पत्रनिबन्धनम्। इति त्रिकाण्डशेषः॥ काचेल इत्यपि पाठो दृष्टः॥ (मुग्धबोधमते "किमः क्यन्ताचिचनौ" इति। का + चनप्रत्ययेन) स्त्रीलिङ्गकिम्शब्दार्थे च। इति व्याकरणम्॥ (यथा, प्रबोधचन्द्रोदये। "व्यूढ़ा काचन कन्यका खलु मया तेनास्मि वाताधिकः"॥)

काचनकं, क्ली, काच्यते लेखो निबध्यते येन (कच् + णिच् + ल्युट्। ततः स्वार्थे कन्।) पत्रनिबन्धनम्। इति हारावली॥

काचनकी, [न्] पुं, (काचनक + अस्त्यर्थे इनिः।) लिपिः। तत्पर्य्यायः। वर्णदूतः २ स्वस्तिमुखः ३ लेखः ४ वाचिकहारकः ५ ताक्षिकः ६। इति जटाधरः॥

काचभाजनं, क्ली, (काचनिर्म्मितं भाजनम्।) काचपात्रम्। काँचेर वासन इति भाषा। तत्पर्य्यायः। शिङ्घानम् २। इति त्रिकाण्डशेषः॥